**तुर्व** हिंसायां भ्वा० पर०सक०सेट्। तूर्वति अतूर्वीत्। तुतूर्वतुः "हत्वं यादिन्द्र तूर्वसि" ऋ० ८।८८।६। "तूर्वणे सहस्तच्छ्रेष्ठमश्विनोरवः" ऋ० ८।८।१२। तूर्वणे। हिंसने" भा०।

**तुर्वणि** त्रि० तूर्णं वनुते वन् संभक्तौ इन् पृषो०। तूर्ण-संभक्तरि "तुर्वणिरहा विश्वेव तुर्वणिः" ऋ०१।१२०।६। "तुर्वणिस्तूर्णवनिः क्षिप्रं संभक्ता तुर्वणिस्तूर्णवनि-रिति निरुक्तम् (६।१४) भा०।

**तुर्वश** पु० नृपभेदे। "त्वमाविथ नर्य्यं तुर्वशं यदुम्" ऋ० १।५४।६। "नर्य्यादीन् हि राज्ञः" भा०। "उत त्या तुर्वशायदू अस्नातारा शचीपतिः" ऋ० ४।३०।१७।

**तुर्वशे** अव्य० अन्तिके निकटे निघण्टुः।

**तुर्वसु** पु० ययातिनृपपुत्रभेदे। "अन्वगच्छत् प्रजां सर्वां ययातिरपराजितः। तस्य पुत्रा महेष्वासाः सर्वे समुदिता गुणैः। देवयान्यां महाराज! शर्म्मिष्ठायाञ्च जज्ञिरे। देवयान्यामजायेतां यदुस्तुर्वसुरेव च। द्रुह्युश्चानुश्च पूरुश्च शर्म्मिष्ठायां प्रजज्ञिरे" भा०आ०७५ अ० तस्मै ययातिशापकथा यथा। "तुर्वसो! प्रतिपद्यस्व पाप्मानं जरया सह। यौवनेन चरेयं वै विषयांस्तव पुत्रक!। पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम्। स्वञ्चैव प्रतिपत्स्यामि पाप्मानं जरया सह। तुर्वसुरुवाच। न कामये जरां तात! कामभोगप्रणाशिनीम्। बलरूपान्तकरणीं बुद्धिप्राणप्रणाशिनीम्। ययातिरुवाच। यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि। तस्मात् प्रजासमुच्छेदं तुर्वसो! तव यास्यति। सङ्कीर्णाचारधर्म्मेषु प्रतिलोमचरेषु च। पिशिताशिषु चान्त्येषु मूढ़! राजा भविष्यसि। गुरुदारप्रसक्तेषु तिर्य्यग्योनिगतेषु च। पशुधर्म्मिषु पापेषु म्लेच्छेषु त्वं भविष्यसि" ८४ अ०। [ऋ०१।३६।१८

**तुर्वीति** पु० राजर्षिभेदे। "इहद्रथं तुर्वीतिं दस्यवे सहः"।

**तुल** उन्माने वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट्। तोलयति ते तोलति अतूतुलत् त। "पतिष्यति क्षितौ भानुः पृथिवीं तोलयिष्यते" भट्टिः। तुलयतीति तु तुलाशब्दात् णिच्। "अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वाम्" "अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः प्रासादास्त्वांघन! तुलयितुमलं यत्र तैस्तैर्विशेषैः" मेघ०। "तुलयति स्म विलोचनतारकाः" माघः। "नक्तन्दिनैस्तुलितकान्तिमभक्तिशोभाः" रघुः।

उद्+उत्क्षिप्य तोलने। उत्तोलयति।

**तुलभ** पु० तुरेण वेगेन भाति भा—ड रस्य लः। आयुधजीवीसंघभेदे। ततः दामन्या० स्वार्थे छ। तुलभीय तदर्थे।

**तुलसारिणी** स्त्री तुरेण वेगेन सरति सृ—णिनि ङीप्। तूणे शब्दमा०।

**तुलसी** स्त्री तुलां सादृश्यं स्यति सो—क गौरा० ङीष् शकन्ध्वा०। स्वनामख्याते वृक्षभेदे। "यस्या देव्यास्तुला नास्ति विश्वेषु चाखिलेषु च। तुलसी तेन विख्याता" शब्दार्थचि० देवीभाग० उक्तनिरुक्तेस्तस्यास्तथात्वम्। "तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत्। दीपनी कुष्ठकृच्छ्रास्रपार्श्वरुक्कफवातजित्। शुक्ला कृष्णा च तुलसी गुणैस्तुल्या प्रकीर्त्तिता" भावप्र० तद्गुणा उक्ताः तुलस्यामाहात्म्यं यथा। "ब्रह्मोवाच। तुलस्याः शृणु माहात्म्यं पापघ्नं सर्वकामदम्। यत्पुरा विष्णुना प्रोक्तं तत्ते वक्ष्याम्यशेषतः। सम्प्राप्तं कार्त्तिकं दृष्ट्वा नियमेन जनार्दनः। पूजनीयो महद्भिश्च कोमलैस्तुलसीदलैः१। दृष्टा२ स्पृष्टा३ तथा ध्याता४ कार्त्तिके नमिता५ऽर्च्चिता६। रोपिता७ सेचिता८नित्यं पापं हन्ति युगार्जितम्। अष्टधा तुलसी यैस्तु सेविता द्विजसत्तम!। युगकोटिसहस्राणि ते वसन्ति हरेर्गृहे। रोपिता तुलसी यावत् कुरुते मूलविस्तृतिम्। तावद्युगसहस्राणि तनोति सुकृतं हरिः। तुलसीदलपुष्पाणि योदद्याद्धरये मुने!। कार्त्तिके सकलं पापं सोऽत्र जन्मार्जितं दहेत्। रोपिता तुलसी यावत् वर्द्धते वसुधातले। तावत्कल्पसहस्राणि विष्णुलोके महीयते। यत्फलं सर्वपुष्पैश्च सर्वपत्रेण यत्फलम्। तुलस्यास्तद्दलार्द्धेन पुण्यं स्याद्विष्णुपूजने। तुलसीगन्धमादाय यत्र गच्छति मारुतः। दिशोदश पुनात्याशु भूतग्रामांश्चतुर्विधान्। तुलसीकाननोद्भूता छाया यत्र भवेन्मुने!। तत्र श्राद्धं प्रदातव्यं पितॄणां तृप्तिहेतवे। तुलसीवीजनिकरो यस्मिन् पतति वै मुने!। तत् स्थानं परमं ज्ञेयं पितॄणां प्रीतिवर्द्धनम्। यस्मिन् गृहे द्विजश्रेष्ठ! तुलसीतलमृत्तिका। तत्रैव नोपसर्पन्ति भूतले यमकिङ्कराः। तुलसीमृत्तिकालिप्तो यदि प्राणान् परित्यजेत्। यमेन नेक्षितुं शक्तो मुक्तः पापशतैरपि। तुलसीमृत्तिकालिप्तं ललाटं यस्य दृश्यते। कुलं स्पृशति नो तस्य कलिर्मुनिवरोत्तम!। यः कश्चित्तुलसीमूले कार्त्तिके केशवप्रियः। दीपं ददाति विप्रेन्द्र! स लभेद्वैष्णवं पदम्। तुलसीकाननञ्चैव गृहे यस्यावतिष्ठते। तद्गृहं तीर्थभूतं हि नायान्ति यमकिङ्कराः।